

# ॥ श्रीसूर्य सप्तकं – स्कन्द पुराणम् ॥

## Sri Surya Saptakam – Sri Skanda Puranam

The following is a rare hymn on **Lord Surya** by **King** taken from **Skanda Puranam**, **Vaishnava Khanda**, **AyodhyA Mahatmya**, and **Chapter 7**. In the brief **Phalashruti**, **Lord Surya** promises to fulfill all rightful desires of those who recite this hymn with immense devotion.

राजोवाच –

भगवन् देवदेवेश नमस्तुभ्यं चिदात्मने ।
नमः सवित्रे सूर्याय जगदानन्द-दायिने ॥ १ ॥

प्रभा-गेहाय देवाय त्रयीभूताय ते नमः ।
विवस्वते नमस्तुभ्यं योगज्ञाय सदात्मने ॥ २ ॥

पराय परमेशाय त्रिलोकी तिमिरच्छिदे ।
अचिन्त्याय सदा तुभ्यं नमो भास्कर तेजसे ॥ ३ ॥

योगप्रियाय योगाय योगज्ञाय सदा नमः ।
ॐकाराय वषट्कार-रूपिणे ज्ञानरूपिणे ॥ ४ ॥

यज्ञाय यज्ञमानाय हविषे ऋत्विजे नमः ।
रोगघ्नाय स्वरूपाय कमलानन्द-दायिने ॥ ५ ॥

अतिसौम्यातितीक्ष्णाय सुराणां-पतये नमः ।
सत्रासाय नमस्तुभ्यं भक्तत्राय प्रियात्मने ॥ ६ ॥

प्रकाशकाय सततं लोकानां-हित-कारिणे ।
प्रसीद प्रणातायाऽद्य मह्यं भक्ति कृते स्वयम् ॥ ७ ॥

### ॥ फलश्रुतिः ॥

अगस्त्य उवाच –

इत्येवं ब्रुवतस् तस्य स प्रसन्नो रविः स्वयम् ।
आविर्भभूव सहसा भक्तस्य प्रिय-काम्यया ॥ ८ ॥

उवाच मधुरं वाक्यं प्रश्रयानत मूर्द्धजम् ॥ ९ ॥

रविरुवाच –

वरं वरय राजेन्द्र प्रसन्नोऽस्मि तवा ऽग्रतः ।
ददामि तद् वरं तेऽद्य यत्त्वया मनसेप्सितम् ॥ १० ॥

राजोवाच –

भगवन् भास्करा ऽनन्त प्रयच्छसि वरं यदि ।
मन् नाम्ना कृत मूर्तिस् ते तिष्ठत्वत्र सदा प्रभो ॥ ११ ॥

रविरुवाच –

एवं अस्तु मनुष्येन्द्र तव वाञ्छा मनोहरा ।
एतत् स्तोत्रं त्वयोक्तं मे ये पठिष्यन्ति मानवाः ॥ १२ ॥

तेभ्यस् तुष्टः प्रदास्यामि सर्वान् कामान् नरेश्वरः ।
तत्तत् स्थानं परां ख्यातिं त्वन् नाम्ना यास्यति क्षितौ ॥ १३ ॥

सर्वान् कामान् अवाप्नोति योऽत्र स्नानं समाचरेत् ।
मद् भक्तेन सदा राजन् कर्तव्यं स्नानं अत्र वै ॥ १४ ॥

यं यं कामं इहेच्छेत तं तं कामं अवाप्नुयात् ॥ १५ ॥

---

**॥ इति श्रीस्कान्दे-महापुराणे वैष्णव-खण्डे अयोध्या-माहात्म्ये श्रीसूर्य स्तुतिः सम्पूर्णम् ॥**